# ह.वि.शि.बो. अभ्यासप्रश्नपत्रम् (मार्च-2024)
# विषय : संस्कृतम्

**कक्षा : दशमी** **कोड न. 049**

**SET : D**

रोल नं० | | | | | | | | | | |

समयः - 3 होराः ] [ पूर्णाङ्काः : 80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 11 तथा प्रश्न 16 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

- **सामान्यनिर्देशाः :-**

(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति –**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 08 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 24 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 22 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 16 अङ्काः |

Download from www.MsEducationTv.com

# खण्डः ‘क’

## अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

अस्मिन संसारे बहूनि धनानि सन्ति। तेषु विद्याधनं सर्वश्रेष्ठं धनम् अस्ति। इदं धनं चौराः चौरयितुं समर्थाः न सन्ति। भ्रातरः भाजयितुं न योग्याः। जनाः यथा यथा धनं व्ययन्ति तथा तथा धनम् अल्पतरं भवति। किन्तु विद्याधनं यथा यथा व्ययते तथा तथा प्रतिदिनं वर्धते। अतः विद्याधनं सर्वधनप्रधानं कथ्यते। विद्यारहितः जनः संसारे पशुना तुल्यः भवति।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(i) विद्याधनं कीदृशं धनम् अस्ति?
(ii) किं सर्वधनप्रधानं कथ्यते?
(iii) विद्यारहितः जनः केन तुल्यः भवति?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(i) विद्याधनं कः हर्तुं न प्रभवति?
(ii) चौराः किं कर्तुं समर्थाः न सन्ति?
(iii) प्रतिदिनं किं वर्धते?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) जनाः यथा यथा धनं व्ययन्ति तथा तथा धनम् .................भवति।
(क) अधिकतमम् (ख) अल्पतरम्
(ग) बृहत्तरम् (घ) वर्धति

(ii) विद्यारहितः जनः कुत्र पशुना तुल्यः भवति?
(क) ग्रामे (ख) विद्यालये
(ग) संसारे (घ) गृहे

(iii) ‘सन्ति’ अस्मिन् पदे कः धातुः?
(क) भव् (ख) सेव्
(ग) गम् (घ) अस्

(iv) ‘हर्तुम्’ अत्र कः प्रत्ययः?
(क) क्त्वा (ख) तुमुन्
(ग) शानच् (घ) ल्यप्

Download from www.MsEducationTv.com

# खण्डः 'ख'

## रचनात्मक-कार्यम्

2. (क) विद्यालये प्रवेशार्थं निवेदनपत्रम् मञ्जूषायां प्रदत्तैः शब्दैः पूरयन्तु – 4

सेवायाम्
प्रधानाचार्यः महोदयः,
रा. व. मा. विद्यालयः,
क ख ग

श्रीमन्तः,

सविनयं (i)................... इदं यत् अहम् अस्मिन् वर्षे भिवानीनगरस्य राजकीयः विद्यालयतः नवमपरीक्षा प्रथमश्रेण्यां सफलतां (ii) ................. अस्मि। मम पितुः अत्र स्थानान्तरणं जातम्। अहं (iii) ................. यत् भवतः विद्यालयः हरियाणाप्रान्ते अति (iv) ............ विद्यालयः अस्ति। अहम् अत्र पठितुम् इच्छामि। आशासे भवान् मम प्रार्थनां स्वीकृत्य मामनुग्रहीष्यति।

भवदीयः
दिनेशः

**मञ्जूषा**

| |
|---|
| जानामि, प्राप्तवान् , प्रतिष्ठितः, निवेदनम् |

2. (ख) निर्दिष्टचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दैः उचितरिक्तस्थानानि पूरयित्वा लिखत – 4



Download from www.MsEducationTv.com

(i) अस्मिन् चित्रे एकं .................... गच्छति।

(ii) एकः बालकः .................. सह आगतः।

(iii) .................... क्षिपत् राजमार्गे यानम् गच्छति।

(iv) अत्र एकः एव .................... अवशिष्टः।

**मञ्जूषा**

| |
|---|
| वृक्षः, मात्रा, धूम्रम्, कारयानम् |

## खण्डः 'ग'

## पठित-अवबोधनम्

3. निम्नलिखितं गद्यांशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्। स व्याघ्रः तथाकृत्वा काननं ययौ। श्रृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती – जम्बुककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम्? परं प्रत्युत्पन्नमतिः सा जम्बुकमाक्षिपन्ति अङ्गुल्या तर्जयन्त्युवाच।

**अथवा**

परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम् " इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौरः आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

4. अधोलिखितश्लोकस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्।।
करणीयं बहिरन्तर्जगति तु बहु शुद्धिकरणम्।
शुचि पर्यावरणम्।।

**अथवा**

निमित्तमुद्दिश्य हि यः प्रकुप्यति,
ध्रुवं स तस्यापगमे प्रसीदति।
अकारणद्वेषि मनस्तु यस्य वै,
कथं जनस्तं परितोषयिष्यति।।

Download from www.MsEducationTv.com

5. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।

(ख) न कुर्यादहितं कर्म परेभ्यः कदापि च।

(ग) अत्यादरः शङ्कनीयः।

(घ) आचारः प्रथमो धर्मः।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

विचित्रे खलुसंसारे नास्ति किञ्चिन्निरर्थकम्।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः।।

**अन्वयः :-**

(1) ............... खलु संसारे (2) ............. निरर्थकं नास्ति। अश्वः चेत्
(3).................वीरः, खरः (4).................वहने (भवति)।

**मञ्जूषा**

| |
|---|
| किञ्चित्, भारस्य, विचित्रे, धावने |

6. अधः प्रदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - 3×1=3

(केवलं प्रश्नत्रयम्)

मयूरः - यतः मम नृत्यं तु प्रकृतेः आराधना। पश्य! पश्य! मम पिच्छानामपूर्वं सौन्दर्यं (पिच्छानुद्घाट्य नृत्यमुद्रायां स्थितः सन्) न कोऽपि त्रैलोक्ये मत्सदृशः सुन्दरः। वन्यजन्तूनामुपरि आक्रमणं कर्तारं तु अहं स्वसौन्दर्येण नृत्येन च आकर्षितं कृत्वा वनात् बहिष्करिष्यामि। अतः अहमेव योग्यः वनराजपदाय।

**प्रश्नाः :-**

(क) कस्य नृत्यं प्रकृतेः आराधना?

(ख) त्रैलोक्ये किं नास्ति?

(ग) मयूरः किमर्थं योग्यः अस्ति?

(घ) 'कोऽपि' अत्र कः संधिविच्छेदः?

7. निम्नलिखितश्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - 2×1=2

Download from www.MsEducationTv.com

(केवलं प्रश्नद्वयम्)

कञ्चित् कालं नय मामस्मान्नगरात् बहुदूरम्।
प्रपश्यामि ग्रामान्ते निर्झर – नदी - पयः पूरम्।।
एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्।

**प्रश्नाः :-**

(क) कञ्चित् कालं मां कुत्र नय?

(ख) ग्रामान्ते किं प्रपश्यामि?

(ग) अस्मान्नगरात् सन्धिविच्छेदं कुरुत।

(घ) 'एकान्ते कान्तारे' अत्र विशेषणपदं किम् अस्ति?

8. रेखाङ्कितपदानि आधृत्य कोष्ठकात् चित्वा प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नत्रयम्) 3×1=3

(क) गज: वन्यपशून् तुदन्तं शुण्डेन पोथयित्वा मारयति। (केन / कम्)

(ख) मयूरस्य नृत्यं प्रकृते: आराधना। (कस्य / कस्याः)

(ग) चौरस्य पादध्वनिना अतिथि: प्रबुद्धः। (कस्य / कैः)

(घ) उभौ शवं चत्वरे स्थापितवन्तौ। (कदा / कुत्र)

9. प्रश्नपत्रे लिखितश्लोकान् विहाय **'शेमुषी भाग-2'** पुस्तकाद् एकं श्लोकं संस्कृतभाषया लिखत। 1x4=4

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

10. (क) गुणसन्धेः अथवा व्यञ्जनसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) द्वन्द्वसमासस्य अथवा बहुव्रीहिसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ग) अपादानकारकस्य अथवा सम्प्रदानकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

Download from www.MsEducationTv.com

11. यथानिर्दिष्टं शब्दरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) ‘राम’ शब्दस्य द्वितीया – बहुवचने।

(ii) ‘लता’ शब्दस्य सप्तमी – एकवचने।

(iii) ‘बालक’ शब्दस्य पञ्चमी – एकवचने।

(iv) ‘रवि’ शब्दस्य प्रथमा – बहुवचने।

(v) ‘नदी’ शब्दस्य द्वितीया – एकवचने ।

(vi) ‘‘अस्मद्’ शब्दस्य पञ्चमी – एकवचने ।

12. यथानिर्दिष्टं धातुरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) गम् (गच्छ्) धातोः लट्लकारः प्र. पु. एकवचने।

(ii) पठ् धातोः लङ्लकारस्य, प्र.पु. बहुवचने।

(iii) ‘भू’ (भव्) धातोः लृट्लकारः, म.पु. एकवचने।

(iv) ‘पा’ (पिब्) धातोः लोट्लकारः, उ.पु. एकवचने।

(v) अस् धातोः विधिलिङ् लकारस्य, प्र.पु. एकवचने।

(vi) दृश् (पश्य) धातोः लट्लकारः, प्र.पु. बहुवचने।

13. प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिं कोष्ठकात् चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) .................... निकषा नदी वहति। (ग्रामं / ग्रामात्)।

(ii) .................... दुग्धं रोचते। (बालात् / बालाय)

(iii) मृगः ................ विभेति। (सिंहात् / सिंहाय)

(iv) पिता..................स्निह्यति। (पुत्रे / पुत्रम्)

(v) अलं......................। (कोलाहलम् / कोलाहलेन)

(vi) .................... पत्राणि पतन्ति। (वृक्षात् / वृक्षस्य)

14. अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत। (केवलं प्रश्नद्वयम्) 2×1=2

(i) ............. जीवनं दुर्वहं जातम्। (सर्वदा / अत्र)

(ii) .................... समयस्य सदुपयोगः करणीयः । (सदा / भृशम्)

Download from www.MsEducationTv.com

(iii) प्राकृतिकवातावरणे क्षणं सञ्चरणम् ............ लाभदायकं भवति। (अपि / कदापि)

15. निम्नक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत। (केवलं प्रश्नद्वयम्) 2×1=2

(i) प्रपद्यते (ii) सुविभक्तता (iii) उपजायते

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

16. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 16×1=16

(क) 'अश्वः'+ चेद्' अत्र किं सन्धियुक्तपदम्?

(i) अश्वचेद (ii) अश्वाश्चेद

(iii) अश्वश्चेद् (iv) अश्वाचेत

(ख) 'तस्यापगमे' इत्यस्मिन् पदे कः सन्धिविच्छेदः?

(i) त + स्यापगमे (ii) तस्या + आपगमे

(iii) तस्य+ अपगमे (iv) तस्य + अपगम

(ग) 'निर्गुणम्' अत्र कः समासः ?

(i) द्विगु: (ii) बहुव्रीहिः

(iii) कर्मधारय: (iv) अव्ययीभावः

(घ) 'देहविनाशाय' अत्र समासविग्रहं किम्?

(i) देहं विनाशाया (ii) देहेन विनाशायं

(iii) देहात् विनाशाय् (iv) देहस्य विनाशाय

Download from www.MsEducationTv.com

(ङ) 'अस्ते' अस्य विलोमपदं किम्?

(i) सुलभः (ii) उदये

(iii) निर्बलः (iv) सुलभे

(च) 'मूर्खः' इत्यस्य पदस्य विलोमपदं किम् ?

(i) दुर्लभः (ii) निर्बलः

(iii) निर्लज्जः (iv) विद्वान्

(छ) 'अश्वः' इत्यस्य पदस्य पर्यायपदं किम् ?

(i) नरः (ii) शावकः

(iii) तुरगः (iv) श्वानः

(ज) 'सविता' इत्यस्य पदस्य पर्यायपदं किम् ?

(i) भास्करः (ii) पावकः

(iii) शशि (iv) चन्द्रः

(झ) 'पठनीय' इत्यस्मिन् पदे कः प्रत्ययः ?

(i) अनीयर् (ii) क्त्वा

(iii) तुमुन् (iv) शानच्

(ञ) 'नी+क्त्वा' इत्यस्मिन् संयोगे किं रूपम् ?

(i) नीत्वा (ii) नीत्वान्

(iii) नेतव्य (iv) नेतुम्

(ट) 'एकोनसप्ततिः' इत्यस्मिन् पदे का संख्या?

(i) 80 (ii) 71

(iii) 70 (iv) 69

Download from www.MsEducationTv.com

(ठ) '16' इत्यस्य पदस्य किं संख्यावाचीपदम्?

(i) षट्
(ii) षोडश
(iii) सप्तदश
(iv) विंशतिः

(ड) 'अहितं कर्मम्' अत्र विशेषणपदं किम् अस्ति?

(i) अहितम्
(ii) अहि
(iii) कर्मम्
(iv) कर

(ढ) 'धर्मप्रदां वाचम्' अत्र विशेष्यपदं किम् अस्ति ?

(i) धर्म
(ii) प्रदाम्
(iii) वाचम्
(iv) धर्मप्रदाम्

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत -

अहं प्रात .................... भ्रमणाय गच्छामि।



(i) पञ्चवादने
(ii) एकवादने
(iii) चतुर्वादने
(iv) द्विवादने

(त) रमा ...................... वादने शयनाय गच्छति।



(i) अष्ट
(ii) द्वादश
(iii) दश
(iv) पञ्च

Download from www.MsEducationTv.com